# श्री कण्णपुरनायकी स्तोत्रम्

पद्मा पयोधरतटीपटीर द्रवरञ्जितम् ।
पातु श्रीशौरिराजाख्यं ज्योतिर्पद्मविलोचनम् ।।

अमन्दानन्द सन्दोहदायिनी शौरिवल्लभा ।
इन्दिरा सन्निदत्तां नो हृदीन्दीवरलोचना ।।

काङ्क्षिताशेषकल्याण कलना कल्पवल्लरीम् ।
कनत्कनक वर्णाङ्गीं श्रये कृष्णपुरेश्वरीम् ।।

अकिञ्चनोनां शरणं पदाब्जं
करेण वामेन विनिर्दिशन्तीम् ।
दत्ताभयामन्य करेण शौरि -
प्रियां नुमः कृष्णपुरेश्वरीं ताम् ।। १

स्वपादकान्त्या हि विनिर्जितं तत्
सरोजमास्थाय निषेदुषी त्वम् ।
पुनश्च तत्स्वीय कराम्बुजेन
धृत्वा हि तन्मानयसीव मातः ।। २

विश्वात्मिके वेद शिरो विमृग्ये
वेधः शिवेन्द्राद्यमराभिवन्द्ये।
विद्युत् प्रभे शौरि मनोनुकूले
विदेहि मां त्वत्करूणैक पात्रम् ।। ३

विक्षेपका हि विषयाः कलिरेष कालः
सङ्गस्त्वसाधुभिरहो हृदयं चलं नः ।
रुग्णं वपुश्च विरला गुरवोऽपि सोऽहं
पात्रं कथन्नु भविता भवदीक्षणानाम् ।। ४

यद्यम्बमां जन्म सहस्रसिद्ध -
पापाकरं निन्दित कर्मभाजम् ।
उपेक्षसे नेदृश पात्रमत्र लभ्यं
तवस्यात् करूणार्द्र चित्ते ।। ५

दुग्धाब्धिस्तव देवि दिव्यवपुषः
सृष्टौ परामद्भुताम्
सामग्रीं समवाप्य तत्र भवतीं
सारैः सृजन्स्त्वत्पिता ।
तच्छिष्टाद्भिरुचिरगात् पुनरमुं
चन्द्रं सुधांश अप्सरो
मुख्यान् अभ्यसृजन्नचेत्
तत इमे नैवस्युरभ्यर्हिताः ।। ६

मातस्त्वया सह निवासमुपेत्य सिन्धौ
पूजां ययुः शशि-शिलातरु-धेनवोऽपि ।
दोषाकरः खलु शशिः शिव शेखरोऽभूत्
अन्ये ह्यवापुरसदृक्षवदान्यभावम् ।। ७

यं त्वं देवि निरीक्षसे
सहि पुमानुर्वीं समुद्रावृतां
शासन् पुण्यफलं सुखं बहुविधं
लब्ध्वा भृशंमोदते ।

तत्रेष्यत्वमुपागतो नतशिरा
अन्योऽपि तच्छासनं
काङ्क्षन् तिष्ठति नेत्रपात्र
मिहते यो नैव जातो भुवि ।। ८

अम्ब नित्य नलिनो तटदीतं
शौरिकल्पतरुं समुपेता ।
संश्रिताखिल पुमर्थ विधात्री दिव्यं
कल्पलतिकेव विभासि ।। ९

इन्दीवराक्षि! तव सादर-वीक्षणेन
प्रेयां स्तवायमभवन् नवनीरतापः ।
तत्पुण्डरीक नयनेन सदा प्रहृष्टा
देवि! प्रतप्त-नव-हेमनिभाऽसि नूनम् ।। १०

भर्ता ते नव-नील-नीरद-वपुः -
श्यामस्त्वतः कीर्त्यते
श्रुत्वा तप्त-सुवर्ण-वर्णा-
इति तद् युक्तं कथं स्यादिति ।

तर्के, तप्त-हिरण्य-रूपिणि!
पतेच्छौरेस्तु वक्षस्थलं
या दायास्तव देव! दिव्य
वपुषो भासेति निश्चिन्वते ।। ११

मातस्त्वदीयेक्षण-पूर्ण-पात्रं
यद् धाम तत्ब्रह्म समामनन्ति ।
तल्लेश-लेशैक-जुषश्चतेऽमी
ब्रह्मेन्द्र मुख्या इति सङ्गिरन्ते ।। १२

कान्तस्तु शौरिरथ ते विधि शम्भु मुख्याः
देवा इमे सदयितास्तव देवि दासाः ।
वाहस्तु लक्ष्मि! गरुडश्शयनन्त्वनन्तः
त्वं श्रीरसीह महिमा तव कोप्यतुल्यः ।। १३